International Journal of Sanskrit Research 2019; 5(4): 341-347

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 341-347
© 2019 IJSR
www.anantaajournal.com
Received: 15-05-2019
Accepted: 17-06-2019

**तरणीकुमारपण्डा**
शोधच्छात्र: संस्कृत-पालि-प्राकृतविभाग:, विश्वभारती शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

**Correspondence**
**तरणीकुमारपण्डा**
शोधच्छात्र: संस्कृत-पालि-प्राकृतविभाग:, विश्वभारती शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

# गरुड़पुराणे मोक्षस्य अवधारणा

**तरणीकुमारपण्डा**

**सारांशः**

संस्कृतसाहित्यवारिधे: महामूल्यं रत्नं भवति पुराणशास्त्रम्। भारतीय-सभ्यताचार-विचाराणां जनतायां येन साहित्येन प्रचारं कृतं, तत् पौराणिकं साहित्यम् एव। साहित्येऽस्मिन् वेद-विहितानां धर्माणांसुखबोध्यभाषायां वर्णनं प्राप्यते। तस्मात् धार्मिकदृष्ट्या पुराणानामस्ति अधिकं महत्त्वम्। उच्यते- "पुरा नवं भवति इति पुराणम्।" संसारारण्येऽस्मिन् बंभ्रम्यमाणानां जीवानांकृते पुराणम् अस्ति सरल: आलोकमार्ग:। परमतत्वदृष्ट्या पुराणं हि अवश्यमेव मोक्षशास्त्रम्। अष्टादश पुराणेषु गरुड़पुराणस्य एकं विशिष्टस्थानम् अस्ति। मोक्षप्रदायके,सर्वपापहरे अस्मिन् पुराणेजीवस्य परमकाम्ये मुक्तिविषये विविधसरलमार्गस्य वार्ता उद्घोष्यते। का भवति मुक्ते: संज्ञा?उच्यते यदा जीव: भोगासक्तिसम्पन्नं जड़देहं त्यत्त्वा आत्मस्वरूपं जानाति तदा तस्य मुक्तिर्भवति। भागवतपुराणे उल्लिखितम् अस्ति-

"मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिति:।"

वस्तुतस्तु जीव: अविद्यावशात्करोति तदर्थं स पुन: पुन: जन्ममरणचक्रम् याति आयाति च। संसारपाशेन आवद्ध: सन्जीव: बहुविधं दु:खं सहते। केवलं गरुड़पुराणस्य निर्देशितमार्गेण तद्दु:खम् सुकरभावेन निराकृतं भवति अर्थात्जीव: मुक्तिभाक् भवति। तस्मात् अस्य पुराणस्य उपदेश: सर्वथा पालनीय:। वस्तुतस्तु जीव: अविद्यावशात्करोति तदर्थं स पुन: पुन: जन्ममरणचक्रम् याति आयाति च। संसारपाशेन आवद्ध: सन्जीव: बहुविधं दु:खं सहते।केवलं गरुड़पुराणस्य निर्देशितमार्गेण तद्दु:खम् सुकरभावेन निराकृतं भवति अर्थात्जीव: मुक्तिभाक् भवति। तस्मात् अस्य पुराणस्य उपदेश: सर्वथा पालनीय:। अत्रसन्न्यासग्रहण-व्रतानुष्ठान-तीर्थसेवन-सत्कर्मानुष्ठान-श्राद्धदान-अनशनव्रत-पुत्रोत्पादन-दान-नामसंकीर्तन-भक्ति-प्राणोत्सर्गोदिभि:सुकरुपायै: जीवस्य मुक्तिवर्णनम् अस्ति।शोधसन्दर्भेऽस्मिन् स्वचिन्तनं मया उपस्थाप्यते ।

**कूटशब्द:** उपोद्घातः मुक्तेः संज्ञा-सन्न्यासग्रहणमाध्यमेन मुक्तिः,व्रतानुष्ठानेन मुक्तिः, तीर्थसेवनेन मुक्तिः-सत्कर्मानुष्ठानेन मुक्तिः--श्राद्धदानेन मुक्तिः-अनशनव्रतेन मुक्तिः-पुत्रोत्पादनेन मुक्तिः-दानेन मुक्तिः नामसंकीर्तनेन मुक्तिः-भक्तिमाध्यमेन मुक्तिः-प्राणोत्सर्गेण मुक्तिःधर्माचरणेन मुक्ति:- वृषोत्सर्गकायेन मुक्ति:- स्नानेन मुक्ति:- श्रवणेन मुक्ति:- उपसंहार:

**प्रस्तावना**

उपोद्घात: संसस्कृतसाहित्यवारिधे: महामूल्यं रत्नं भवति पुराणशास्त्रम्। भारतीय-सभ्यताचार-विचाराणां जनतायां येनसाहित्येन प्रचारं कृतं, तत्तु पौराणिकं साहित्यम् एव। साहित्येऽस्मिन् वेद-विहितानां धर्माणांसुखबोध्यभाषायां वर्णनं प्राप्यते। तस्मात् धार्मिकदृष्ट्या पुराणानामस्ति अधिकं महत्त्वम्। उच्यते- "पुरा नवं भवति इति पुराणम्।"संसारारण्येऽस्मिन् बंभ्रम्यमाणानां जीवानांकृते पुराणम् अस्ति सरल: आलोकमार्ग:। परमतत्वदृष्ट्या पुराणं हि अवश्यमेव मोक्षशास्त्रम्।अष्टादश पुराणेषु गरुड़पुराणस्य एकं विशिष्टस्थानम् अस्ति। मोक्षप्रदायके, सर्वपापहरे अस्मिन् पुराणेजीवस्य परमकाम्ये मुक्तिविषये विविधसरलमार्गस्य वार्ता उद्घोष्यते। वस्तुतस्तु जीव: अविद्यावशात्करोति तदर्थं स पुन: पुन: जन्ममरणचक्रम् याति आयाति च। संसारपाशेन आवद्ध: सन्जीव: बहुविधं दु:खं सहते।केवलं गरुड़पुराणस्य निर्देशितमार्गेण तद्दु:खम् सुकरभावेन निराकृतं भवति अर्थात्जीव: मुक्तिभाक् भवति। तस्मात् अस्य पुराणस्य उपदेश: सर्वथा पालनीय:। अत्रसन्न्यासग्रहण-व्रतानुष्ठान-तीर्थसेवन-सत्कर्मानुष्ठान-श्राद्धदान-अनशनव्रत-पुत्रोत्पादन-दान-नामसंकीर्तन-भक्ति-प्राणोत्सर्गोदिभि: सुकरुपायै: जीवस्य मुक्तिवर्णनम् अस्ति। शोधसन्दर्भेऽस्मिन्स्वचिन्तनं मया उपस्थाप्यते ।

**मुक्ते: संज्ञा**

धर्मादिषु चतुर्बिधपुरुषार्थेषु मोक्ष:हि श्रेष्ठ:पुरुषार्थ:। मोक्षशब्दस्य पर्यायवाचकशब्द: भवति मुक्ति:। का भवति मुक्ते: संज्ञा? उच्यते यदा जीव: भोगासक्तिसम्पन्नं जड़देहं त्यत्त्वा आत्मस्वरूपं जानाति तदा तस्य मुक्तिर्भवति।

भागवतपुराणे उल्लिखितम् अस्ति-

> "मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिति:।" [1]

अपि च निरालम्वउपनिषदि कथ्यते-

> "नित्यानित्यवस्तुविचारादनित्यसंसारसमस्तसं ङ्कल्पक्षयो मोक्ष:।"

अर्थात् यदा वस्तुविचारेण नित्यं वस्तु निर्णितं भवति तदा अनित्यसंसारस्य समुदयसंकल्पस्य विनाशो भवति। सकलसंकल्पनाशात् जीवस्य मुक्तिर्भवति।पुराणे पञ्चविधा: मुक्तय:उल्लिखिता: सन्ति। ता: खलु यथा-सालोक्यमुक्ति, सामीप्यमुक्ति:, सायुज्यमुक्ति:, सार्ष्टिमुक्ति:, सात्मतामुक्तिश्च। गरुड़पुराणे एतादृश्य: मुक्तय: परिलक्ष्यन्ते।

**सन्न्यासग्रहणमाध्यमेन मुक्ति:**

प्रत्यासन्ने मरणे सन्न्यासग्रहणं कुर्यात्।यदि कोऽपि मानव: समागते मरणकाले यथाविधि सन्न्यासग्रहणं करोति तर्हि तस्य पुण्यवत: ब्रह्मणा सह लीनं भवति, तस्यापि पुनरावर्त्तनं न भवति। "मम सन्न्यासं भवतु" इति-वाक्यमिदं य: मानवगण: देहान्तकाले उच्चारयति,स मरणात् परं विष्णुपुरं गच्छति।तस्मात् लोकात् स कदापिन पुर्नजायते। इयमेव मुमुक्षुजनस्य सालोक्यमुक्ति: कथ्यते-

> "सन्न्य्यस्तमिति यो व्रूयात् प्राणै: कण्ठगतैरपि।
> मृतो विष्णुपुरं याति न पुनर्जायते क्षितौ।।" [2]

**व्रतानुष्ठानेन मुक्ति:**

मार्गमन्तरा यदि तीर्थे आनीत- मुमूर्षु-रुग्नजनस्यमरणं साधयति तर्हि स पुण्यात्मा तद्परिमाणं मार्गम् अतिक्राम्यति, तद्परिमाणं यज्ञस्य फलं प्राप्नोति। न केवलं तद् मरणमासन्नमिति ज्ञात्वा यदि कोऽपि मानव: अनशनव्रतं पालयति तर्हि अनेन कर्मणा स मुमुक्षुजन: संसारे न पुनर्जायते। गरुड़पुराणे उल्लिखितमस्ति-

"तीर्थप्राप्तौ भवेन्मुक्तिर्म्रियते यदि मार्गग:।
पदे पदे क्रतुसमं भवेत्तस्य न संशय:।।
गृहनाशयाच्चेदर्शनं व्रतं विधिवदागते।
मृत्यौ न सोऽपि संसारे भूय:पर्य्यटति द्विज।।" [3]

अस्मिन् पुराणे अपमृत्युनिष्कृते: विधानरूपेण कृच्छ्र-तप्तवच्छ्र-कृच्छ्रसान्तपनव्रतानाञ्च अनुष्ठानस्यवार्ता उद्घोष्यते।अनेन व्रतत्रयेण कर्मसम्पादने कृते मृतनर: निर्वाणपदं प्राप्नोति।यथा संस्कारेण दीपं निर्वाणं भवति तथैव मृतजनोऽपि निर्वाणं प्राप्नोति-इत्यत्र नास्ति सन्देह:। भगवता श्रीकृष्णेणोच्यते-

"मया तेऽयं समाख्यातोदुर्मृतस्यविधि: खग।
तदाहं विजानीक्यीपनिर्व्वाणमागत:।।" [4]

**तीर्थसेवनेन मुक्ति:-**

अत्र तीर्थदर्शनं तीर्थस्नानञ्च मुक्ते: सरलमार्गरूपेण वर्ण्यते। हंस-विश्वरूप-वन्दी-रत्नेश-कुहकाचलानांतीर्थानां दर्शनेन कोटिपातकेभ्य: अनुष्ठातु: मुक्तिर्भवति। अपि च तत्र नारायणाश्रम-सरस्वती-दृशद्वती-लोमशर्मदा-नर्मदा-नीलकण्ठ-महाकालामरकण्टक-चन्द्रभागा-वेत्रवती-वीरभद्र-गणेश्वर-गोकर्ण-विल्वतीर्थ-कर्मकुण्ड-ताराकुण्डादिषु तीर्थेषु अवगाहने कृते स्नाता सर्वपापेभ्य:द्रागेव मुक्तिर्भवति। उच्यते अस्मिन् पुराणे-

"गोकर्णं विल्वतीर्थञ्च कर्मकुण्डं सतारकम्।
स्नानमात्रेण यत्राशु मुच्यते कर्म्मवन्धनात्।।" [5]

त्रयोदश जातिषु मनुष्यत्वं लव्धापि यदि कोऽपि मानव: भारततीर्थे प्राणांस्त्यजति तर्हि तस्यापि पुनर्जन्म न भवति। उच्यते काश्यपनन्दनेन गरुड़ेन-

"मानुष्यं भारते वर्षे त्रयोदशसु जातिषु।
तत् प्राप्य म्रियते क्षेत्रे पुनर्जन्म न विद्यते।।" [6]

सप्तविधानि मुक्तिदायकक्षेत्राणि यथा-अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्ती,द्वारवती च।एषु सप्तसु पुरीषु यदि आगतजनस्य मरणं भवेत् तर्हि तस्य मुमुक्षुजनस्य अवश्यमेव मुक्तिर्भवति-

"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती ज्ञेया सप्तैता मोक्षदायिका:।।" [7]

यत्र शालग्रामलिशाया:द्वारवतीशिलायाश्च सङ्गमम् अस्ति उत यस्मिन् स्थले उभयशिला विद्यते तत्र यदि कस्यचित् पुण्यात्मजनस्य मरणं भवति तर्हि तस्य निश्चितमेव मुक्तिर्भवति-

"शालग्रामशिला यत्र यत्र द्वारवती शिला।
उभयो:सङ्गमो यत्र मुक्तिस्तत्र न संशय:।।
शालग्रामशिला यत्र पापदोषक्षयावहा।
तत्सन्निधानमरणान्मुक्तिर्जन्तो:
सुनिश्चिता।।" [8]

**सत्कर्मानुष्ठानेनमुक्ति:**

मानवगण: यदि स्वेषु स्वेषु कर्मेषु यदि तत्पर: भवति तर्हि तस्य सिद्धि: अवश्यमेव भवति। सुखं दु:खञ्च सर्वमेव कर्मफलम्- इत्यनेन ज्ञानेन सर्वं कल्मषं विदूरितं भवति।भगवत: वासुदेवस्य चिन्तनेन विशुद्ध: सन् धृतिना आत्मसंयमनं कृत्वा शब्दादिविषयान् रागद्वेषादयान् परिहृत्य निर्जनप्रदेशे मुमुक्षुजनस्य आश्रयग्रहणं कुर्यात्।तत्र अवस्थित: सन् वैराग्ययुक्तचित्ते सततं स्वल्पाहारं कृत्वा कायमनोवाक्यानि संयम्य ध्यानयोगे नियुक्त: भवेत्।अहंकार-वल-दर्प-काम-क्रोधादिविषयान् परित्यागेन निर्मम -शान्तचेता च भवितुम् अर्हति।एवम् अनुरागेन नरगण:मुक्तिभाक् भवति।उच्यते अस्मिन् पुराणे-

"ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रित:।
अहंकारं वलं दर्पं कामं क्रोधं परिग्रहम्।
विमूच्य निर्म्मम: शान्तो ब्रह्मभूयाय कल्पते।।

अत: परं नृणां कृत्यं नास्ति कश्यपनन्दन।।" [9]

य: मानव: प्रेतत्वात् मोक्षमिच्छति स अवश्यमेव स्ववर्णाश्रमविहितकार्यम् साधयिष्यति-

"प्रेतत्वान्मोक्षमिच्छन्तो ये करिष्यन्ति सतिक्रयाम्।" [10]

**श्राद्धदानेन मुक्ति:**

अत्र प्रेतस्य मुक्तिलाभार्थं श्राद्धादि अनुष्ठानम् आवश्यिककर्तव्यरूपेण वर्ण्यते-

"एवं ज्ञात्वा खगश्रेष्ठ प्रेतमुक्तिं समाचरे।" [11]

प्रेतगण:पुत्रादीन् प्रति अधिष्ठित: सन् मोक्षलाभे असमर्थो भवति। तदा स यमोलोकमाश्रित्य तिष्ठति। यत:तत्रस्थितस्य मानवगणस्यकालयोगेन यदा कर्मक्षयं भवति तदा स प्रेतगण: मुक्तो भवति। उच्यते अस्मिन् पुराणे-

"तत्रस्थानां भवेन्मुक्ति: स्वकाले कर्म सङ्क्षये।" [12]

**अनशनव्रतेन मुक्ति:**

नीरोगदेहे यदि मुक्तिकामी मानव: अनशनव्रतस्य अनुष्ठानं करोति तर्हि अनुष्ठातु: मुक्तिलाभे समर्थो भवति। उच्यते अस्मिन् पुराणे-

"तस्मादनशनं नृणां वैकुण्ठपददायकम्।
तस्मात् स्वस्थे चोत्तरे वा साधयेन्मोक्षलक्षणम्।।" [13]

य: मानव: अनशनव्रतपालनमाध्यमेन प्राणांस्त्यजति, स संसारवन्धनात् मुक्तो भवति। य: पुण्यात्मा ब्रह्मणेभ्य: सर्वस्वं यच्छति, स अवश्यमेव मोक्षपदम् अलंकरोति-

"अनाशके मृतो यस्तु स मुक्तवन्ध्नै:।।
दत्त्वा दानानि विप्रेभ्यस्ततो मोक्षमवाप्नुयात्।।" [14]

**पुत्रोत्पादनेन मुक्ति:**

येन तेन प्रकारेण पुत्रोत्पादनम् अवश्यमेव करणीयम्। पुत्रात् यदि न मुक्ति: भवति तर्हि अनशनव्रतेन अनुष्ठातु: मुक्तिर्भवति अपि चनरकात् परित्राणं भवति। उच्यते गरुड़पुराणे-

"येनकेनाप्युपायेन कार्यं जन्म सूतस्य च।
तारयेन्नरकात् पुत्रो यदि मोक्षं न विद्यते।।" [15]

यदि कोऽपि मानव: अनशनं कृत्वा प्राणांस्त्यजति तर्हि स मानवदेहं परिहृत्य भगवत: तुल्यं भवितुम् अर्हति। प्रत्यहं विप्रभोजनम्, तिलपात्रदानम्, सोमर्थ्योनुसारेण दीपदानम् देवार्च्चनञ्च-इमानि कर्माणि सम्पादनेन पातकस्य महापापं क्षणादेव भस्मीभूतं भवति। यथा महर्षिगण: मरणात् परं अमरत्वं प्राप्नोति तथैव उद्दिष्टजनोऽपि मरणात् परं मुक्तिभाजनं भवितुम् अर्हति-

"एवं वृत्तस्य दहयन्ति पापान्युच्चावचानि च।
मृतो मुक्तिमवाप्नोति यथा सव्र्वे महर्षय:।।"[16]

**दानेन मुक्ति:**

प्रेतम् उद्दिश्य अन्न-जलसंयुक्तंकुम्भदानं कुर्यात्।यत:दानमिदं मुक्तिप्रदायकरूपेण उल्लिखितवान् भगवान् श्रीकृष्ण:-

"प्रेतोद्देशेन दातव्या अन्नपानीयसंयुता:।
विशेषेण महापक्षिण:प्रेतमुक्तिदायका:।।" [17]

धर्मराजम् उद्दिश्य वर्धनीप्रदाने कृते प्रेतस्य मुक्तिर्भवति। गरुड़पुराणे उल्लिख्यते-

"एको वै धर्मराजाय तेन तुष्टेन मुक्तिभाक्।" [18]

**नामसंकीर्तनेन मुक्ति:**

कलियुगे नामसंकीर्तनं हि जीवस्य मुक्तिलाभस्य सुकरं कारणम्। साधक: उत भक्तजन: सर्वावस्थायांनामकीर्तनस्य योग्य: भवति। य: मानव: हरिरित्यक्षरद्वयं सकृत् उच्चारणं करोति स मोक्षलाभे सदा वद्धपरिकरो भवति। अपि च य: मानव:प्रतिदिनंकृष्णनामेन भगवन्तं स्मरति तं मानवं जलं भित्त्वा पद्र्मोमस्य तुल्यं श्रीभगवान् रक्षति उद्धारं करोति वा। उच्यते श्रीभगवता-

> "सकृदुच्चरितं येन हरिरित्यक्षरद्वयम्।
> वद्ध:परिकरस्तेन मोक्षाय गमनं प्रति।।
> कृष्ण कृष्णेति यो मां स्मरति नित्यश:।
> जलं यथा पद्मं करकादुद्धराम्यहम्।।" [19]

**भक्तिमाध्यमेन मुक्ति:**

भगवन्तं प्रति ऐकान्तिकप्रेमानुराग: हि भक्ति:। भक्ति: जीवस्यमुक्तिकारणं भवति। काष्ठादिषु शिलासु च सदैव देवताया: अधिष्ठानं करोतितर्हि काष्ठादीन् प्रति देवज्ञानेन भक्ति: कर्तव्या।अनेनअनुष्ठानेन साधकस्य मुक्तिर्भवति-

> "न काष्ठे विद्यते देवो न शिलायां कदाचन।
> भावे हि विद्यते देवस्तस्माद्भावं समाचरेत्।।" [20]

य: मानव: विवेकयुक्तया वुद्ध्याभक्तियोगसहकारेण हृदि परमात्मन:अनुशीलनं करोति, स पुण्यात्मा अवश्यमेवभगवन्तंश्रीहरिं पश्यति। यत:प्रीतमना हरि:भक्तियोगेन तुष्ट: सन् तं भक्तं आत्मस्वरूपं दर्शयति। श्रीभगवद्दर्शनार्थं उद्दिष्टजन: कृतार्थ: भवति। अपि च स आत्मानं सर्वविषयेभ्य: आत्मानं मोचयितुं समर्थो भवति । उच्यते अस्मिन् पुराणे-

> "भक्तियोगेन सन्तुष्ट: आत्मानं दर्शयेदज:।
> तत: कृतार्थो भवति सदा सर्व्वत्र निष्पृह:।।" [21]

**प्राणोत्सर्गेणमुक्ति:**

अपि च ब्रह्मण-गो-वालकान् य: प्राणोत्सर्गेण रक्षति तर्हि स रक्षक: अवश्यमेव मुक्तिभाक् भवति। उच्यते अस्मिन् पुराणे-

> "ब्रह्मणार्थे गवार्थे च स्त्रीणां वालवधेषु च।
> प्राणत्यागपरो यस्तु स खलु मोक्षमवाप्नुयात्।।" [22]

**धर्माचरणेन मुक्ति:**

अस्मिन् महापुराणे अपवर्गस्य मूलकारणरूपेण धर्म:उल्लिखित: भवति। तस्मात् धर्माचरणं सततं कर्तव्यम्। पर्याप्तै: अर्थै: धर्मपालनं न भवति। श्रद्धया केवलं धर्म: नियन्त्रित: भवति। श्रद्धावान् अकिञ्चन:मानव:स्वर्गं प्राप्नोति।उच्यते-

> "धर्म्म एवापवर्गाय तस्मात् धर्मं समाचरेत्।" [23]

अपि च उच्यते य: मानव: मनुष्यत्वं लव्ध्वापिधर्माचारणं करोति स निश्चितमेव परमगतिं प्राप्नोति अर्थात् मोक्षं लभते-

> "यस्तत् प्राप्य चरेद्धर्मं स गच्छेत् परमां गतिम्।" [24]

**वृषोत्सर्गकायेन मुक्ति:**

सर्वेषु यज्ञेषु वृषयज्ञ: श्रेष्ठ:। तस्मात् सर्वप्रकारेण प्रयत्नन अस्य यज्ञस्य अनुष्ठानं कर्तव्यम्। यदि कस्यचित् पुत्रवत: मानवस्य देहान्तं भवति तस्य मुक्तयर्थं वृषयज्ञस्य अनुष्ठानं न भवति तर्हि उद्दिष्टटमानवस्य प्रेतत्वं मुक्तिं न भवति। पक्षान्तरे अपुत्र: सन् य: वृषोत्सर्गकार्यं सम्पादयति स सुखेनमहापथं गच्छति।अत: वृषोत्सर्गेण मानवस्य परमां गतिं भवति, यद् अग्निहोत्रादिभि:यागकायेत्तद् फलं न भवति-

"एवं ज्ञात्वा खगश्रेष्ठ वृषयज्ञंसमाचरेत्।
अकृत्वा म्रियते यस्तुअपुत्रो नैव मुक्तिभाक्।।
अपुत्रोऽपिहि यः कुर्य्यात् सुखं याति महत् पथम्।
अग्निहोत्रादिभिर्यज्ञैर्दानैश्च विविधैरपि।
न तां गतिमवाप्नोति वृषोत्सर्गेण या गतिः।।" [25]

**श्रवणेन मुक्तिः**

मरणप्रत्यासन्ने सति मुमुर्षूमानवस्य समीपे सेतुसामादिसूक्तम् अवश्यमेव पठनीयम्। सूक्तमिदं श्रवणात् अनन्तरं यः मानवः पञ्चत्वं गच्छति स निश्चितमेव मुक्तिभाक् भवति। उच्यते अस्मिन् पुराणे-

"सेतुसामादिसूक्तैस्तु मरणं मुक्तिदायकम्।।" [26]

**आराधनाकार्येन मुक्तिः**

शरीरमेव जीवगणस्य नरकप्राप्तेः मोक्षप्राप्तेश्च कारणंभवति। वहुसाधनात् अनन्तरं वयं दुर्लभं मनुदेहं प्राप्नुमः। तर्हि वयं सर्वे सर्वशक्तिसम्पन्न-ईश्वरस्य सकाशे ऋणवद्धोऽस्मः। केवलं भक्तिपूर्वक-आराधनाकार्येनतं ऋणं मोचयितुं शक्नुमः। तस्मात् भगवान् अस्मभ्यं जीवदेहं प्रयच्छति, तस्य पूज्यतमस्य अवश्यमेव आराधनाकार्यं कुर्यात्। उच्यते अस्मिन् पुराणे-

"शरीरमेव जन्तूनां स्वर्गमोक्षैकसाधनम्।" [27]

**स्नानेन मुक्तिः**

तीर्थस्नानं सर्व-सुकरमोक्षमार्गेषु अन्यतमम्। कार्यमिदं निर्विघ्ने सम्पाद्य जीवः मोक्षलाभे समर्थो भवति।यः मानवः सत्यजलपूर्णे रागद्वेषादिमलहीनज्ञानह्रदे मानसतीर्थे अवगाहनं करोति स कदापि पापकार्ये नआसक्तो भवति-

"ज्ञानह्रदे सत्यजले राग-द्वेषमलापहे।
यः स्नातो मानसे तीर्थे न स लिप्यते पातकैः।। " [28]

अतः मुमुक्षुजनस्य मानसतीर्थे स्नानकार्यम् अवश्यमेव कर्तव्यम्।

**उपसंहारः**

परिशेषे उच्यते यत् मानवगणःश्रवणपुटाभ्यांयस्यामृतं विन्दुमात्रं पीत्वापि निर्वाणपदवीम् अलंकरोति, तद् भवतिवाक्यसुधा-धारासारस्वरूपं गरुड़पुराणम्। पुराणमिदं प्राचीनतमं प्रक्षेपविहीनंस्वस्वरूपे सुरक्षितं चसात्त्विकपुराणम् भवति। अस्य महापुराणसस्य पुण्योदकेन सिक्तः सन्मुक्तिकामी मानवः सुदुलर्भं मोक्षपदं प्राप्तुं शक्यते। पुराणेऽस्मिन् सन्न्यासग्रहण-व्रतानुष्ठान-तीर्थसेवन-सत्कर्मानुष्ठान-श्राद्धदान-अनशनव्रत-पुत्रोत्पादन-दान नामसंकीर्तन -भक्ति-प्राणोत्सर्गोदिभिः इत्यादि उपायमाध्यमेन जीवस्य वन्ध्नपाशमोचनस्य वार्ताम् उद्घोषयति। एतद् न केवलम् अत्र स्नान-याग-आराधनादिकार्यैः मोक्षविषये विशेषवर्णनं प्राप्यते। मुमुक्षुमानवं निकषाएतेउपायाःअनुकरणीयाः। अतः जीवःमोक्षप्रदायकस्य गरुड़पुराणस्य समीपे अधमर्णः वर्तते इत्यत्र नास्ति संशयः।मुक्तिविषयकम्आलोचनमिदंदिग्विस्मृत-मुमुक्षुजनस्य सकाशे उज्ज्वलवर्त्तिकास्वरूपम्।

**तथ्यसूत्राणि**


1.भागवतपुराणम्(२/१०/६)
2.गरुड़पुराणम्(उत्तरखण्डम्/३७/२१)
3.गरुड़पुराणम्(उत्तरखण्डम्/५/३७,३९)
4.गरुड़पुराणम्(उत्तरखण्डम्/५/१६५)
5.गरुड़पुराणम् (उत्तरखण्डम्/१/७५)
6.गरुड़पुराणम् (उत्तरखण्डम्/३७/१८)
7.गरुड़पुराणम् (उत्तरखण्डम्/३७/१९)
8.गरुड़पुराणम् (उत्तरखण्डम्/३७/२३,२४)
9.गरुड़पुराणम्(उत्तरखण्डम्/११/९५,९६)
10.गरुड़पुराणम्(उत्तरखण्डम्/१५/४४)

11.गरुड़पुराणम्(उत्तरखण्डम्/२१/४४)

12.गरुड़पुराणम्(उत्तरखण्डम्/२१/१७)

13.गरुड़पुराणम्(उत्तरखण्डम्/३६/१२)

14.गरुड़पुराणम्(उत्तरखण्डम्/३७/३१,३२)

15.गरुड़पुराणम्(उत्तरखण्डम्/३१/५)

16.गरुड़पुराणम् (उत्तरखण्डम्/३६/११)

17.गरुड़पुराणम् (उत्तरखण्डम्/३७/३)

18.गरुड़पुराणम् (उत्तरखण्डम्/३७/९)

19.गरुड़पुराणम् (उत्तरखण्डम्/३७/२१,२२)

20.गरुड़पुराणम्(उत्तरखण्डम्/३७/२७)

21.गरुड़पुराणम्(उत्तरखण्डम्/(७/१००)

22.गरुड़पुराणम्(उत्तरखण्डम्/३७/३०)

23.गरुड़पुराणम्(उत्तरखण्डम/१३/२५)

24.गरुड़पुराणम्(उत्तरखण्डम्/१९/२०)

25.गरुड़पुराणम्(उत्तरखण्डम्/१५/७-९)

26.गरुड़पुराणम्(उत्तरखण्डम् /१६/८)

27.गरुड़पुराणम्(उत्तरखण्डम्/२१/३०)

28.गरुड़पुराणम्(उत्तरखण्डम्/३७/२६)

**ग्रन्थसन्दर्भा**


1. उपाध्याय, वलदेव, पुराणविमर्ष, चौखाम्वाप्रकाशन, वाराणसी: १८९७ (तृतीय संस्करण), मुद्रित। वसु, गिरीन्द्रशेखर, पुराण प्रवेश, विवेकानन्द वुक सेन्टार, कलकाता: २०१२ मुद्रित। गरुड़पुराण, सम्पा. पञ्चानन तर्करत्न, नवभारत पावलिशार्स, कलकाता: १४१६, मुद्रित। शास्त्री, माधवाचार्य, पुराण दिग्दर्शन, माधवापुस्तकालय, दिल्ली: १९५८ मुद्रित।
2. WilliamsMonier M. A Dictionary English and Sanskrit,Motilal Baranasidas Publishers Private Limited, Delhi: 2012 (Reprint), print. Kolkata: 1954 (1st ed.), print. Bhattacharya, Srimohan and Bhattacharya, Dinesh Chandra, Bharatiya Darsana Kosa (Vedanta), Calcutta: (Kolkata), Sanskrit College,(Vol.3, Part 1,1981)(Calcutta Sanskrit College Reserch Series No.121) (Vol.3 Part 2, 1983)(Calcutta Sanskrit College Reserch Series No.124), print.Banerji, Sures Chandra, ACompanion to Sanskrit Literature, MLBD,Delhi, 1989. (2nd ed.), print.